# Shri Shivakamasundari Trishati Nama Stotram

# શ્રીશિવકામસુન્દરીત્રિશતીનામસ્તોત્રમ્

## Document Information

Text title : Shri Shivakamasundari Trishati Nama Stotram

File name : shivakAmasundarItrishatanAmastotram.itx

Category : devii, trishatI, devI, pArvatI

Location : doc_devii

Transliterated by : NA

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : May 11, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

Shri Shivakamasundari Trishati Nama Stotram

# શ્રીશિવકામસુન્દરીત્રિશતીનામસ્તોત્રમ્

પૂર્વપીઠિકા
કૈલાસમધ્યશૃઙ્ગાગ્રે કલ્પવૃક્ષાદિસઙ્કુલે ।
નાનામૃગગણાકીર્ણે મન્દમારુતવીજિતે ॥ ૧॥

પક્ષિવૃન્દરવોદ્ભૂતમદનાધિક્યવૈભવે ।
શૃઙ્ગારવિપિને યાસા પદ્માકરસરસ્તટે ॥ ૨॥

ચિન્તામણિશિલાક્લૃપ્તહર્મ્યપ્રાકારશોભિતે ।
મણિમણ્ડપમધ્યે ચ દિવ્યસિંહાસને શુભે ॥ ૩॥

આસીનં લીલયા જાતુ મહાદેવં સ્મિતાનનમ્ ।
પ્રણિપત્ય મુદા ગૌરી પ્રોવાચ વચનં મધુ ॥ ૪॥

શ્રીગૌર્યુવાચ
દેવદેવ મહાદેવ નાથ સર્વજ્ઞ સર્વગ ।
લોકે વ્યાધિદરિદ્રાદ્યૈઃ પિશાચાદ્યૈશ્ચ પીડિતાઃ ॥ ૫॥

સર્વે જનાઃ કથં તેભ્યો મુચ્યેરન્ પરમેશ્વર ।
તદુપાયં વદેશાન લોકાન્ ઉદ્ધર્તું આદરાત્ ॥ ૬॥

ઇતિ પૃષ્ટો ગિરિજયા શિવઃ સઙ્કલ્પવર્જિતઃ ।
ભદ્રે સાધુ ત્વયા પૃષ્ટં સર્વલોકહિતાય મામ્ ॥ ૭॥

વક્ષ્યામ્યુપાયં દારિદ્ર્યભયવ્યાધિવિનાશનમ્ ।
ધનધાન્યાયુરારોગ્ય-ધર્મકામાર્થમોક્ષદમ્ ॥ ૮॥

વિદ્યાકીર્તિકરં નૃણાં પઠનાદસ્ય સિદ્ધિદમ્ ।
નામ્નાં ત્રિશતસઙ્ખ્યાકં સ્તોત્રં મન્ત્રાક્ષરાઙ્કિતમ્ ॥ ૯॥

શિવકામસુન્દરીદેવ્યાઃ શિવાયાઃ પરમેશ્વરિ ।
કથયામિ તવ સ્નેહાન્ન પ્રકાશ્યં કદાચન ॥ ૧૦॥

ગોપનીયં પ્રયત્નેન મર્મસ્થલવદીશ્વરિ ।
શિરોઽપિ દાતું યુક્તં હિ ન તદ્દાતું પ્રયત્નતઃ ॥ ૧૧॥

ઋષિર્બ્રહ્માઽસ્ય ગાયત્રીચ્છન્દઃ શ્રીસુન્દરી શિવા ।
સહસ્રનામવત્સર્વં કરાઙ્ગન્યાસકૌ ચરેત્ ॥ ૧૨॥

દેવતા કથિતા ચાસ્ય સ્તોત્રસ્ય હિ વરાનને ।
જિતેન્દ્રિયો જિતક્રોધશ્ચિન્તયેત્ સુન્દરીં હૃદિ ॥ ૧૩॥

॥ ધ્યાનમ્ ॥

ઉદ્યદ્ભાસ્કરસન્નિભાં દ્વિનયનાં હેમાનાનાબ્જાં ચતુ-
ર્હસ્તૈરમ્બુજસ્રક્શુકં કટિકરં સમ્બિભ્રતીં શૂલિનઃ ।
નૃત્તાઽમ્બરધૂર્વહાં શિવમયીં પદ્માસનાધ્યાસિનીં
ધ્યાયેઽહં પરમેશ્વરીં હૃદિ સદા શ્રીબ્રહ્મજાયાં શિવામ્ ॥ ૧૪॥

શિવકામસુન્દરીં શ્યામાં શિવાં શિવકરીં શુભામ્ ।
શિવકામકોષ્ઠનિલયાં ધ્યાયેઽહં શિવમોહિનીમ્ ॥ ૧૫॥

ચિન્તિતાર્થફલદાયિનીમુમાં ચિત્તરઙ્ગતલનિત્યવાસિનીમ્ ।
ચિત્સભેશ મહિષીં સદાશિવાં ચિન્તયામિ શિવકામસુન્દરીમ્ ॥ ૧૬॥

ઇતિ ધ્યાત્વા મહાદેવીં મનસાભ્યર્ચ્ય સાધકઃ ।
લમિત્યાદિમવર્ણૈશ્ચ પઞ્ચ પૂજાઃ તતઃ પરમ્ ॥

તતઃ પઠેત્સ્તોત્રરાજં સર્વસૌભાગ્યવર્ધકમ્ ॥ ૧૭॥

અથ ત્રિશતનામસ્તોત્રમ્ ।
ઓતપ્રોતાણ્ડનિવહાઽપ્યોજસ્વત્યોઘપૂજિતા ।
ઓઙ્કારગૃહકર્પૂરદીપિકા ચૌદનપ્રિયા ॥ ૧॥

ઓઙ્કારપઞ્જરશુકી ચોઙ્કારમનુવાદિની ।
ઓઙ્કારમધ્યનિલયાઽપ્યોજોનાથસમર્ચિતા ॥ ૨॥

ઓઙ્કારવાચ્યા ચોઙ્કારમુખ્યા ચોઙ્કારરૂપિણી ।
ઓઙ્કારશુક્તિકામુક્તામણિશ્ચોઙ્કારશબ્દિતા ॥ ૩॥

ચક્રહસ્તા ચતુર્વેદવેદ્યા ચામીકરાસના ।
ચક્રાયિતસખીવૃન્દા ચન્દ્રમણ્ડલમધ્યગા ॥ ૪॥

ચઞ્ચચ્ચગ્રજિતબિમ્બાભશુકસઙ્ગીતમોદિની ।

ચણ્ડકોદણ્ડનિર્મુક્તબાણચ્છન્નદિગન્તરા ॥ ૫॥

ચણ્ડકોપારુણમુખી ચણ્ડભૈરવમોહિની ।
ચણ્ડતાણ્ડવપાણ્ડિત્યપ્રકાશનપટીયસી ॥ ૬॥

ચણ્ડનાગપરીતાઙ્ગી ચણ્ડદૈત્યશિરોહરા ।
ચણ્ડમાર્ત્તાણ્ડધિક્કારિચન્દ્રહાસકરામ્બુજા ॥ ૭॥

ચણ્ડરાવશિવાવૃન્દનિર્જિતામ્ભોધિનિસ્સ્વના ।
ચતુરાનનસમ્પૂજ્યા ચતુરા ચતુરાર્ચિતા ॥ ૮॥

ચન્દ્રિકાસિતદંષ્ટ્રાગ્રા ચન્દનદ્રવભૂષિતા ।
ચમ્પકાશોકપુન્નાગપુષ્પમાલાલસત્કચા ॥ ૯॥

ચરાચરોદ્ભવા ચારુહાસા ચર્માम्બરપ્રિયા ।
ચાપબાણગદાખડ્ગશઙ્ખચક્રલસત્કરા ॥ ૧૦॥

ચામરગ્રાહિણીવાણીરમેન્દ્રાણીસમાવૃતા ।
ચામુણ્ડા ચણ્ડિકા ચણ્ડમુણ્ડાસુરવિનાશિની ॥ ૧૧॥

ચારુહીરમણીભાસ્વત્કિરીટા ચક્રવર્તિની ।
ચિત્રલેખા ચિત્રરથા ચિત્રલેખાપિતૃ(પતી)ડિતા ॥ ૧૨॥

ચિત્રસેનસ્તુતા ચિત્રયુદ્ધનિર્જિતદાનવા ।
ચિત્રાંશુકા ચિત્રકર્મા ચિત્રાનક્ષત્રપૂજિતા ॥ ૧૩॥

ચિદાનન્દપ્રદા ચિત્રા ચિત્રનૃત્તપરાયણા ।
ચિન્તાધિકપ્રદા ચિન્ત્યા ચિદમ્બરનિવાસિની ॥ ૧૪॥

ચિરઞ્જીવિસમારાધ્યા ચિન્મયી ચિદ્વિલાસિની ।
ચિરન્તની ચિદાકાશમધ્યગા ચિત્સ્વરૂપિણી ॥ ૧૫॥

ચિમ્બીજા ચણકપ્રીતા ચણન્નૂપુરપાદુકા ।
ડાકિની ડમરુસ્વાનભીષણા ડાકિનીશ્વરી ॥ ૧૬॥

ડાડિમીકુસુમપ્રીતા ડાડિમીમધુલમ્પટા ।
ડામરી ડામરીતન્ત્રરૂપા ડુણ્ડિસમર્ચિતા ॥ ૧૭॥

ડામરીમુખ્યશક્ત્યૌઘપરિષ્કૃતનિકેતના ।
ડમ્બાડમ્બમનોહારી ડિમ્બોન્મત્તવિનાશિની ॥ ૧૮॥

ઢક્કાધ્વનિસમુત્પન્નશબ્દસર્વસ્વતન્ત્રિણી ।
ઢક્કાનિનદસમ્મુહ્યદ્દેવરાજાભયઙ્કરી ॥ ૧૯॥

નકુલીધ્વસ્તનાગાલિર્નકુલી નકુલેશ્વરી ।
નખાગ્રવિલસદ્વિષ્ણુદશાકારા નટેશ્વરી ॥ ૨૦॥

નટરાજાઙ્ગના નાટ્યકોવિદા નાગરાર્ચિતા ।
નમ્રદિક્પાલવનિતા નમદાનન્દદાયિની ॥ ૨૧॥

નરકત્રાણનોદ્યુક્તા નન્દ્યાવર્તસુમપ્રિયા ।
નરસિંહગલોન્મુક્તરુધિરાસ્વાદનપ્રિયા ॥ ૨૨॥

નાગકન્યાપરિવૃતા નાગાસુરવિમર્દિની ।
નાગાનનસુતા નાગવાહા નરશવાસના ॥ ૨૩॥

નાદ બ્રહ્મમયી નિત્યનિર્વાણસુખદાયિની ।
નામમન્ત્રજપપ્રીતિકારિણી નાગભૂષણા ॥ ૨૪॥

નામરૂપધરા નાનાવેદશાસ્રાર્થદર્શિની ।
નારાયણી નામરૂપવર્જિતા નરવાહના ॥ ૨૫॥

નારી નરેન્દ્રસમ્પૂજ્યા નગરાજનિકેતના ।
નાલીકલોચના નન્દિવિદ્યા નગસુતા નટી ॥ ૨૬॥

નાસાસ્તબ્ધમરુચ્ચણ્ડવેગા નગરપાલિની ।
નિર્મલા નિરહઙ્કારા નિજભક્તાખિલેષ્ટદા ॥ ૨૭॥

નિસ્સારા નિયતિર્નિત્યા નિર્લોભા નિરવગ્રહા ।
નૌકારૂઢા નીતસુધાવાર્ધિભક્તજનપ્રિયા ॥ ૨૮॥

વૃન્દાનાથશિરોહર્ત્રી વૃન્દામોહિતમાધવા ।
વૃન્દારકવધૂવૃન્દસેનાસ્તિમિતતાપસા ॥ ૨૯॥

વૃન્દારકારિદર્પઘ્ની બૃહત્સેનાસમાવૃતા ।
વૃન્દારકેશવિલસદ્વેણુનાદકૃતાદરા ॥ ૩૦॥

બૃહચ્છૂલશિરઃ પ્રોતશુમ્ભદૈત્યભયઙ્કરી ।
બૃહતીક્કણનોદ્યુક્તનારદર્ષિસમર્ચિતા ॥ ૩૧॥

બૃહન્મદ્દલભૃચ્ચક્રપાણિસન્નુતવૈભવા ।
બૃહસ્પતિસમારાધ્યા બ્રાહ્મી બ્રહ્મૈક્યરૂપિણી ॥ ૩૨॥

બ્રહ્મજા બૃહદૈશ્વર્યદાયિની બ્રૂમ્મનુપ્રિયા ।
બ્રહ્મજાયા બ્રહ્મબીજા બ્રહ્માણી બ્રહ્મવાદિની ॥ ૩૩॥

બ્રહ્મજ્ઞા બ્રહ્મજનની બ્રહ્મજ્ઞાનપ્રદાયિની ।
બ્રહ્મદેવલયાસક્તતાણ્ડવોદ્દણ્ડપણ્ડિતા ॥ ૩૪॥

બ્રહ્મપઞ્ચકસંરૂઢા બ્રહ્માણ્ડાન્તકરામ્બુજા ।
બ્રહ્મમાયા બ્રહ્મશીર્ષમાલામણ્ડનમણ્ડિતા ॥ ૩૫॥

બ્રહ્મયજ્ઞપરાધીનહૃદયા બ્રહ્મવિત્પ્રિયા ।
બ્રહ્મવિદ્યા બૃહદ્રૂપા બૃહતી બ્રાહ્મણપ્રિયા ॥ ૩૬॥

બ્રહ્મવિષ્ણુમુખોદ્ગીતવૈભવા બ્રાહ્મણાર્ચિતા ।
બ્રહ્મશીર્ષહરા બ્રહ્મકપાલવરધારિણી ॥ ૩૭॥

બ્રહ્મહીનમખાસક્તદક્ષમુખ્યવિનાકૃતા ।
બ્રહ્માણ્ડનિવહોદ્ભેદતાણ્ડવેશ્વરવાદિની ॥ ૩૮॥

બ્રહ્માણ્ડસાક્ષિણી બ્રહ્મમોદિની બ્રહ્મ એવ ચ ।
બ્રાહ્મી માહેશ્વરીમુખ્યશક્તિવ્યાપ્ત સભાઙ્ગણા ॥ ૩૯॥

મદિરાસ્વાદરસિકા મધુરા મધુવૈરિણી ।
મનોતિગા મનોગમ્યા મતઙ્ગતનયા મધુઃ ॥ ૪૦॥

મનોવાગપરિચ્છિન્ના મહાત્રિપુરસુન્દરી ।
મન્ત્રિણી મન્ત્રતન્ત્રજ્ઞા મહાગાયત્રિરૂપિણી ॥ ૪૧॥

મહતી મદનાનન્દકારિણી મનુપૂજિતા ।
મહનીયા મહી મન્દગમના મધુરસ્વના ॥ ૪૨॥

મહર્ષિગણસમ્પૂજ્યા મહારાજ્ઞી મનોન્મની ।
મહાકાલી મહાલક્ષ્મીઃ મહાવાણી મહાકૃતિઃ ॥ ૪૩॥

મહાદેવાઙ્કપર્યઙ્કા મહાવાક્યાર્થગોચરા ।
મહાદેવી મહોત્સાહા મરાલીગતિદેશિકા ॥ ૪૪॥

મહામણિઘટાકારકિરીટા મઞ્જુભાષિણી ।
મહામાયા મહાઘોરસ્વપ્નવારાહિરૂપિણી ॥ ૪૫॥

મહામારી મહાતિલ્વવનમધ્યનિકેતના ।

મહાશ્મશાનનટનરસિકા મધુપાયિની ॥ ૪૬॥

મહિમાલબ્ધસિદ્ધીન્દ્રમુખ્યાદૃષ્ટસ્વરૂપિણી ।
માણિક્યવીણાસંલાપા મારાન્તકવિમોહિની ॥ ૪૭॥

માણિભદ્રસ્તુતા માન્યા માનિની માનવર્જિતા ।
માધ્યન્દિનફણીશાનજૈમિનિસ્તુતનર્તના ॥ ૪૮॥

મારી માતઙ્ગિની માતા મહાશૈલશરીરજા ।
માંસપૂજાપરા માંસભક્ષિણી માષલમ્પટા ॥ ૪૯॥

માહેન્દ્રજાલચતુરા મહાદુર્ગા મહેશ્વરી ।
મીનાક્ષી મિથુનાકારા મદની માદિપઞ્ચકા ॥ ૫૦॥

મુકુન્દસહજા મુદ્રામુખ્યા મૂકત્વનાશિની ।
મુક્તાહારલસદ્ગ્રીવા મુચુકુન્દનૃપાર્ચિતા ॥ ૫૧॥

મુદિતા મુણ્ડશયની મુક્તિદા મુરશાસના ।
મૂર્તા મૂર્ખત્વશમની મૂલવિદ્યાસ્વરૂપિણી ॥ ૫૨॥

મૂલાધારાદિષટ્ચક્રનિલયા મૂલમન્ત્રવિત્ ।
મૂમ્બીજા મૂર્ધસમ્બદ્ધપુષ્પમાલાવિરાજિતા ॥ ૫૩॥

મૃડાની મૃગયાસક્તા મૃગેન્દ્રાર્દ્રાજિનચ્છદા ।
મોહાન્ધકારમાર્તાણ્ડા મોક્ષદાનપરાયણા ॥ ૫૪॥

મોદિનીપૃષ્ટવાગ્દેવતાષ્ટકસ્તુતવૈભવા ।
શિવકામસુન્દરી દેવી શિવદા શિવવામગા ॥ ૫૫॥

હયાનનમુખોદ્ભૂતપુરાણમહિમોજ્જ્વલા ।
હયારૂઢાદિસંસેવ્યા હીરદંષ્ટ્રા હલાયુધા ॥ ૫૬॥

હરમાનસસમ્મોહશૃઙ્ગારરસવારિધિઃ ।
હરલીલાવિનોદજ્ઞા હારિણી હરિણેક્ષણા ॥ ૫૭॥

હરાગ્નિદગ્ધકન્દર્પજીવનાપાઙ્ગલોચના ।
હરાર્ધાઙ્ગહરા હેયદેયોપાદેયવર્જિતા ॥ ૫૮॥

હરાઙ્કનિલયા હૃદ્યા હૃદયાકાશમધ્યગા ।
હરિણાઙ્કધરા હાદિવિદ્યા હરિસહોદરી ॥ ૫૯॥

હરિદ્રાચૂર્ણસમ્પૂર્ણચરણા હ્રીમ્મનુપ્રિયા ।
હરિનાભિસરોજોદ્ધત્પદ્મ સંસ્તુતયોગિની ॥ ૬૦॥

હરિબ્રહ્માદિમકુટનીરાજિતપદામ્બુજા ।
હરિબ્રહ્મેન્દ્રવિનુતા હેલાનિર્જિતદાનવા ॥ ૬૧॥

હરિશઙ્કરસમ્મુહ્યદ્દારુકારણ્યતાપસા ।
હરેન્દ્રમૃતસઞ્જીવદ્બ્રહ્મશીર્ષાલિગાયકા ॥ ૬૨॥

હર્યક્ષવાહનારૂઢા હેલાકલિતવિગ્રહા ।
હાકિની હલિકૃષ્ણેડ્યા હંસમન્ત્રસ્વરૂપિણી ॥ ૬૩॥

હારાયિતફણીરત્નન પ્રભાજિતહિમાંશુકા ।
હાલાહલાગ્નિસન્તપ્તદેવત્રાણામૃતેશ્વરી ॥ ૬૪॥

હાસોદ્ધત્કાલિકાભુક્તરક્તબીજાસુરા હરા ।
હાહાકારરવાક્રન્દન્મહિષાસુરમર્દિની ॥ ૬૫॥

હિમાદ્રિતનયા હંસવાહા હાનિવિવર્જિતા ।
હેમઘણ્ટાલિઝઙ્કારજિતકલ્પાશનિધ્વનિઃ ॥ ૬૬॥

હેમપદ્મધરા હસ્તચતુરા હેમકઞ્ચુકી ।
હેમાદ્રિતુઙ્ગશ◌ૃઙ્ગાગ્રમણિમણ્ડપમધ્યગા ॥

હ્રીમ્બીજેત્યન્તનામ્નાં ચ ત્રિશતં કથિતં તવ ॥ ૬૭॥

ઉત્તરપીઠિકા
શિવકામસુન્દરીનામાન્યેતાનિ શુભદાનિ હિ ।
સર્વસૌભાગ્યદં પુણ્યં વિઘ્નધ્વાન્તનભોમણિમ્ ॥ ૬૮॥

આયુષ્કરં કીર્તિકરં તુષ્ટિદં પુષ્ટિદં પ્રિયે ।
વિદ્યાબુદ્ધિપ્રદં નૃણાં સકૃત્સ્મરણમાત્રતઃ ॥ ૬૯॥

યો જપિત્વા મહામન્ત્રં શિવકામ્યાઃ સહસ્રકમ્ ।
ત્રિશતં વા યથાશક્તિ પઠેત્સર્વાર્થદાયકમ્ ॥ ૭૦॥

યદિષ્ટં સા દદાત્યેવ સદ્ય એવ ન સંશયઃ ।
શુક્રવારે તથા ભૌમવારે પર્વણિ વા પ્રિયે ॥ ૭૧॥

કૃષ્ણાઙ્ગારચતુર્દશ્યામષ્ટમ્યાં ચ વિશેષતઃ ।
પદ્મૈર્વાઽન્યસુમૈર્બિલ્વૈર્હરિદ્રાકુઙ્કુમૈઃ પ્રિયે ॥ ૭૨॥

એભિઃ સમર્ચયેદ્દેવીં નામભિઃ સાધકોત્તમઃ ।
મૂર્તૌ વા યન્ત્રરાજે વા ઘટે વાઽઽવાહ્ય સુન્દરીમ્ ॥ ૭૩॥

અચિરાદેવ વિન્દેત વાગીશત્વં સુલોચને ।
શ્રીશત્વં સર્વસિદ્ધીનાં નાયકત્વં લભેદ્ ધ્રુવમ્ ॥ ૭૪॥

ભૂતપ્રેતપિશાચાનાં સ્મરણાદ્ ભીતિકારણમ્ ।
યો વિપ્રશ્શાન્તહૃદયો નિત્યં નિષ્કામનાયુતઃ ॥ ૭૫॥

આવર્તયેદિદં સ્તોત્રં તસ્ય શ્રીમત્કૃપાબલાત્ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાન્ સોઽન્તે જન્માદિવર્જિતમ્ ॥ ૭૬॥

જીવબ્રહ્મૈક્યચિદ્રૂપપદં પ્રાપ્નોત્યસંશયઃ ।
એતત્સ્તોત્રોપમં સ્તોત્રં નાન્યદસ્તિ હિ સુવ્રતે ॥ ૭૭॥

મયાપિ તત્ફલં વક્તું ન શક્યં કેન વા શિવે ।
તસ્માદિદં ગોપનીયં ચ પ્રકાશ્યં પ્રયત્નતઃ ।
કિં ભૂયશ્શ્રોતુકામાસિ શ‍ૃઙ્ગારાબ્ધિસુધાકરે ॥ ૭૮॥

ઇતિ ભૃઙ્ગિરિટિસંહિતાયાં શક્ત્યુત્કર્ષપ્રકરણે શિવગૌરીસંવાદે
શ્રી શિવકામસુન્દરીત્રિશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Shivakamasundari Trishati Nama Stotram*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*